# CSM—76/22

# SANSKRIT

## PAPER—I

Candidate must not write on this margin.

**Time : 3 Hours**

**Full Marks : 250**

*The figures in the right-hand margin indicate marks.*

*Candidates should attempt **any 10 (ten)** questions of **GROUP—A** with word limit of 250 words and should attempt **any 5 (five)** questions from **GROUP—B** with word limit of 300 words.*

*At least three questions must be answered in Sanskrit and the remaining questions may be answered either in Sanskrit or in the language opted by the candidate.*

## GROUP—A

Answer *any* **ten** questions from Group—A with 250 words for each question carrying 15 marks each.

1. सवर्णसंज्ञा प्रातिपदिकसंज्ञां च ससूत्रं सोदाहरणं च विवृणुत।

2. अच्सन्धेः हल्सन्धेः विसर्गसन्धेश्च प्रत्येकमुदाहरणद्वयं ससूत्रं साधयत।

3. संस्कृतसमाससिद्धान्तानधिकृत्य प्रबन्धं रचयत।

4. वाच्यपरिवर्त्तनप्रसङ्गे कारकप्रकरणस्योपयोगितां निरूपयत।

5. भारतीयभाषाणां शुद्धताज्ञाने संस्कृतभाषाज्ञानस्योपादेयतां प्रतिपादयत।

6. लौकिकसंस्कृतभाषापेक्षया वैदिकसंस्कृतभाषायाः वैशिष्ट्यं प्रकाशयत।

7. वैदिकसाहित्यमधिकृत्य निबन्धमेकं रचयत।

8. रामायणमहाभारतयोः तुलनामूलकं प्रबन्धं लिखत।

9. संस्कृतवाङ्मये कालिदासस्य योगदानमधिकृत्य निबन्धं रचयत।

10. संस्कृतसाहित्ये भवभूतेः योगदानमधिकृत्य निबन्धं प्रणयत।

11. कादम्बरीमधिकृत्य कश्चिन्निबन्धो लेखनीयः।

12. पञ्चतन्त्र-हितोपदेशयोः साम्यं वैषम्यं चाधिकृत्य निबन्धं रचयत।

Candidate must not write on this margin.

## GROUP—B

Answer *any* **five** questions from Group—B with 300 words for each question carrying 20 marks each.

13. भारतीयवर्णश्रमव्यवस्थामधिकृत्य निबन्धं प्रणयत।

14. आधुनिकप्रशासनव्यवस्थायां कौटिलीयार्थशास्त्रस्य प्रासङ्गिकतां विचारयत।

15. पूर्वमीमांसोत्तरमीमांसादर्शनयोः तुलनामूलकं प्रबन्धं लिखत।

16. सांख्ययोगदर्शनयोः साम्यं वैषम्यं चाधिकृत्य कश्चिन्निबन्धो लेखनीयः।

17. संस्कृतभाषायाः तत्साहित्यस्य चाध्ययनेन को लाभ इति विषयमधिकृत्य निबन्धं लिखत।

18. अधःप्रदत्तं गद्यखण्डं पठित्वा तत्र प्रदत्तानां प्रश्नानामुत्तराणि लिखत : 1×20=20

अयोध्यानृपतेर्दशरथस्य तिस्रो महिष्यो बभूवुर्यासु कौसल्या ज्येष्ठा कैकेयी च कनिष्ठा बभूव। रामादयश्चत्वारः पुत्रास्तस्य प्राणेभ्योऽपि प्रियतरा आसन्। वसिष्ठादिब्राह्मणानाममात्यानाञ्च उपदेशेन परिणते वयस्युपनीतो राजा दशरथो ज्येष्ठापत्यं रामं यौवराज्ये अभिषेक्तुमैच्छत्। तदसहमाना कैकेयी कपटेन स्वपुत्रं भरतमेव यौवराज्याभिषिक्तं विधातुं स्वभर्तारं दशरथं प्रेरयामास। सत्यवचननिष्ठो राजा प्रेष्ठमपि ज्येष्ठं रामं कैकेयीवचनाद्वनं यापयामास तत्पुत्रं भरतञ्च यौवराज्ये अभिषेक्तुमनुज्ञां ददौ। सुमित्रातनयो लक्ष्मणो जनकनन्दिनी सीता च स्वपतिना कौसल्यात्मजेन सह वनं जगाम। वनं प्रस्थितेषु तेषु पश्चात्तापेन प्रबलेन समाक्रान्तो राजा दशरथः प्राणांस्तत्याज। अरण्यवासावधौ लङ्केशो रावणः जनकात्मजां सीतां दण्डकारण्यादपजहार। सीतायाः समानयनार्थं रामो हनुमदादीनां कपीनां सुग्रीवादीनां बन्धूनां च साहय्येन समुद्रं बद्ध्वा लङ्कायां रावणं सवंशं निहत्य स्वजायां सीतामुद्दधार। लक्ष्मणादिभिर्बन्धुवर्गैः परिवृतो रामोऽयोध्यां प्रतिनिवृत्यायोध्यायां स्वप्रजा अनुरञ्जयन् चिराय राज्यं चक्रे। रामराज्ये सर्वेऽपि जनाः सर्वभावेन कुशला अभूवन्। अद्यापि सौराज्यस्य प्रशंसा जनैः रामराज्यमिति शब्देन क्रियते।

(i) दशरथः कस्य देशस्य राजा बभूव?

(ii) दशरथस्य कियत्यः पत्न्यो बभूवः?

Candidate must not write on this margin.

*(iii)* रामस्य जननी कासीत्?

*(iv)* दशरथस्य ज्येष्ठपुत्रः कोऽभूत्?

*(v)* दशरथः कदा रामं यौवराज्येऽभिषेक्तुमैच्छत्?

*(vi)* कैकेय्याः पुत्रः कोऽभूत्?

*(vii)* दशरथस्य प्रेष्ठः कोऽभूत्?

*(viii)* लक्ष्मणस्य जननी कासीत्?

*(ix)* सीता कस्य तनयाभूत्?

*(x)* रामेण सह कः वनं जगाम?

*(xi)* दशरथः किमर्थं भरतं यौवराज्येऽभिषेक्तुमैच्छत्?

*(xii)* दशरथः कदा मृत्युं प्राप?

*(xiii)* रावणः कस्य देशस्य राजा बभूव?

*(xiv)* कस्मात्स्थानाद्रावणः सीतामपजहार?

*(xv)* रावणः कदा सीतामपाहरत्?

*(xvi)* समुद्रबन्धने रामस्य सहायाः के बभूवः?

*(xvii)* रामो रावणं कुत्र जघान?

*(xviii)* रामसेवकेषु कपिषु कः मुख्यो बभूव?

*(xix)* कैः परिवृतो रामोऽयोध्यां प्रतिनिववृते?

*(xx)* सौराज्यस्य प्रशंसाद्यापि केन शब्देन क्रियते?

★★★